National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 145-149
© 2026 NJHSR
www.sanskritarticle.com

**Dr. Lipi Patra**
Sanskrit Lecturer (Guest),
Raisuan Higher Secondary school,
Raisuan Keonjhar, Odisha

**Correspondence:**
**Dr. Lipi Patra**
Sanskrit Lecturer (Guest),
Raisuan Higher Secondary school,
Raisuan Keonjhar, Odisha

# वैज्ञानिकमते सृष्ट्युत्पत्तौ कालाकाशयोर्भूमिका

**Dr. Lipi Patra**

**प्रस्तावना -** विश्वोद्भवस्य व्याख्यार्थं पाश्चात्यमते विकासवादसिद्धान्तानां श्रेष्ठता प्रमाणिताऽस्ति । सामान्यतया विकासवादपरम्परा पाश्चात्यदर्शनस्य सिद्धान्तरूपे विद्यते । पाश्चात्यमते या विकासवादस्य परमप्रा विद्यते सा परम्परा तु वेदेष्वपि लभ्यते । यथा ऋग्वेद उक्तम् -

**सहस्रशीर्षाः पुरुषाः सहस्राक्षः सहस्रपात् ।**
**स भूमिं विश्वतो वृत्त्यात्यतिष्ठति दशाङ्गुलम् ॥**
**पुरुष एवेदं सर्वं यद्भूतं यच्चभव्यम् ।**
**एतावानस्य महिमा ततो जायांश्च पुरुषः ।**
**पादोऽस्य विश्वभूतानि त्रिपादस्यामृतं दिवि ॥**[1]

पाश्चात्यमतानुसारं विश्वस्य विकासः तस्य पुरुषस्य अन्तर्लयनकारणात् सम्भवोऽभवत्। स पुरुषः पूर्णरूपेण अस्मिन् विश्वे अन्तर्लीनो नास्ति अतः विश्वस्य विकासः अग्रेऽपि शेषोऽस्ति ।

अनयोर्द्वयोर्वाक्ययोः सिद्धं भवति यत् विश्वस्य विकासः कालक्रमेण अग्रे अभवत्, भवति भविष्यति च। त्रिषु कालेषु अविरतभावेन विकासः सम्भवोऽस्ति । एवमेव नासदीयसूक्तेऽपि विकासवादः सिद्धोऽस्ति ।[2]

तैतरीयोपनिषद्यपि उक्तम्- यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति .......तद् ब्रह्मेति ।[3]

अत्र वेदोपनिषद्वाक्येषु सृष्टिविकासस्य त्रीणि चरणानि विद्यन्ते -

1. सर्वश्रेष्ठसत्ता / ब्रह्म ।
2. ब्रह्मण आत्मचेतना ।
3. आनन्दार्थम् आत्मचेतनायाः विश्वरूपे प्रक्षेपणम् ।

पाश्चात्यमतानुसारं विकासवादस्य क्रमेऽस्मिन् डॉ. राधाकृष्णन् वदति -

The one revealed in the existence of the world and that is why we are able to ascertain the degree of reality possessed by the objects of the world by measuring the distance separating them from the one, Each lower degree consists in a diminution of the higher, throug throughout the scale of existences from the highest to the lowest we have the revelation of brhaman asa well as the common characters of space, time and cause.[4]

उपनिषविद्यानुसारं ब्रह्म एवं संसारस्य मूलं कारणमस्ति । ब्रह्मणः विश्वस्य रमिकविकास उत्क्रमिकरूपेण भवति । जड-जीवन-मनोविज्ञानानन्दादीनि क्रमशः ब्रह्मणो विकसितरूपाणि सन्ति ।

प्राचीनधार्मिकानां सिद्धान्तां पश्चात् 1858 तमे वर्षे चार्ल्सडार्विन-अल्फ्रेडरसेलमहोदयौ एको नवीनो विकासवादीसिद्धान्तः प्रकाशितमकुरुतः यं सिद्धान्तं डार्विनमहोदयः स्वपुस्तके 'ऑन ओरिजन ऑफ् स्पीशीज' (1859) इत्यत्र विस्तरेण अवबोधितवान्। अस्य सिद्धान्तानुसारं सृष्टेरुत्पत्तिः वर्षाणां क्रमिकविकासकारणादभवत्। क्रमिकविकासप्रवाहात् अमीबाप्राणितः मत्स्यस्य, मत्स्यात् खगानाम्, खगेभ्यः वानराणं वानरेभ्यश्च मानवानां क्क्रमिकविकासोऽभवत्। प्राणी स्वस्यावश्यकतानुसारं आस्थानुसारञ्च परिवर्त्तितोऽभवत्।

लघुकोशिकायाः विकसितरूपः लघुमत्स्यः, मत्स्यस्य विकसितरूपः दीर्घमत्स्यः, ततः व्हेलमत्स्यः च निर्मितः । जीवा एते शनैः शनैः स्तनवन्तो वानराः वनमानुषाश्चाभवन् । वनमानुषवानरेभ्यः मानवाः विकसिता अभवन्। अस्य सिद्धान्तानुसारं मानवस्योत्पत्तिकालः सामान्यतः 10 लक्षवर्षाणि पूर्वमिति पाश्चात्याः वैज्ञानिकाः मन्यन्ते।[5] विंशतितमशताब्द्यां खगोलवैज्ञानिकाः सृष्ट्युत्पत्तेरनेकसिद्धान्ताः प्रस्तुतवन्तः येषु परस्परं किञ्चित्साम्यं किञ्चिच्च वैष्यम्यासीत्। 1931 तमे वर्षे कैथोलिकसन्तः भौतिकी-वैज्ञानिकः जॉर्जेस लेमेत्रेमहोदयः बिगबैंग इति भौतिकसिद्धान्तं प्रस्तुतवान् तदा परामर्शं दत्तवान्।

विश्वसृष्टिसन्दर्भे ग्रीकदार्शनिकयोः ल्यूलिपिअस-डिमोक्रेटस-महोदयोः मतमपि वैशेषिकन्यायदर्शनयोः सममस्ति। ग्रीकम-होदयोर्मते विश्वस्य संरचना परमाणुसंयोगादभवत्। पाश्चात्यविद्वन्मते परमाणुः कस्यापि वस्तोरविभाज्यः, न्यूनतमः केन्द्रबिन्दुरस्ति । एते परमाणव एव विश्वस्य आधारशीला विद्यन्ते। यथा एकया वर्णमालया सुखान्तदुखान्तसाहित्ययोः सृजनं भवति तद्वदेव परमाणूनां विविधसंयोगैः शरीरादीनां सृजनं भवति तत्रैव परमाणूनां वियोगाच्च विनाशः (लयो) भवति।[6]

अनयोः संयोगविभागयोः कारणं परमाणूनामान्तरिकगतिरस्ति। अस्याः गतेः कोऽपि कर्त्त नास्ति। गतिरियं यान्त्रिकनियमैः शासिता भवति। परमाणुषु गुणात्मकभेदो नास्ति परिमाणात्मको भेदो भवति। पाश्चात्यवैशिषिकपरमाणुवादयोः साम्यमस्ति। द्वावेव जगतः उपादानकारणं परमाणुः स्वीकुर्वतः। परञ्चात्र द्वयोर्मतयोः भेदोऽपि वर्त्तते। वैशेषिकानुसारं परमाणुषु गुणात्मकभेदः मात्रात्मकभेदश्चास्ति परञ्च पाश्चात्यमते परमाणुषु गुणात्मकभेदो नास्ति परिमाणात्मको भेदस्त्वस्ति। वैशेषाकानुसारं परमाणुषु गतिः अदृष्टत्वाद् भवति सा चादृष्टगतिरपि ईश्वराधीनाऽस्ति । परञ्च ग्रीकदर्शनमते परमाणुसंयोगो यन्त्रवद्भवति ।

सर्वेक्षणान्तरं ज्ञायते यत् पाश्चात्यदर्शनस्योपरि 17 शताब्द्यां जीवविज्ञानस्य प्रभावः प्रत्यक्षरूपेण दरीदृश्यते। अत्र जैविक-विकासस्य एका शृङ्खला निर्मिता भवति। पाश्चात्यमते विकासवाक्रमस्य अधोलिखिताः विभागाः प्राप्यन्ते[7] –

क)ब्रह्माण्डविषयको विकासवादः - अस्मिन् विभागे सम्पूर्णब्रह्माण्डस्य विकासाध्ययनमस्ति ।

ख) पृथिवी-सम्बन्धितो विकासवादः - अस्मिन् विभागे पृथिव्या आदौ वर्तमानपर्यन्तं परिवर्त्तनानाध्ययनमस्ति ।

ग)भूगर्भविषयकविकासवादः - अस्मिन् विभागे पृथिव्या आन्तरिकभागे परिवर्तनानामध्ययनमस्ति ।

घ) जीवविषयको विकासवादः - अस्मिन् विभागे सम्पूर्णे जीवजगति क्रमिकपरिवर्तनानामध्ययनमस्ति ।

पाश्चात्यमते विकासवादस्य एते चत्वार एवार्थाः सन्ति ।

एवं पाश्चात्यविकासवादो द्विविध इति वक्तुं शक्यते । तौ स्तः - 1) यान्त्रिको विकासवादः, 2) प्रयोजनात्मकः विकासवादः ।

1) यान्त्रिको विकासवादः - यान्त्रिकविकासवादान्तर्गते स्पेन्सर-लोमार्क-डार्विन-महोदयैः प्रतिपादितानां सिद्धान्तामुल्लेखोऽस्ति ।

2) प्रयोजनात्मकः विकासवादः। प्रयोजनवादविकासवादस्य तत्त्वानि लाइबनिजसिद्धान्ते प्राप्यन्ते । 16 (दत्त, डी. एम. चीप. करेन्ट्स ऑफ़ कन्टेम्परारी फिलॉसफी, पृष्ठः - 261)

एतदरिक्तम् आरिस्टोटल -हीगेलमहोदयोः सिद्धान्तेषु अपि प्रयोजनात्मविकासवादो परिलक्षति । प्रसाद, राजेन्द्र, दर्शनशास्त्र की रूपरेखा, पृष्ठः -128

हरबर्टस्पेन्सरमहोदयः विकासप्रक्रियाः तिस्रो विशेषताः उक्तवान्, ताः सन्ति- 1) संयोजनम्, 2) विभाजनम्, 3) व्यवस्थापनम् ।

1)संयोजनम्- संयोजनं संयुक्तक्रिया उच्यते। हरबर्टस्पेन्सरमहोदय-स्याशयः विकासप्रक्रियायां संयुक्तभावस्य प्रवृत्तिरित्यस्ति। अभिप्रायोऽयमस्ति यत् पूर्वं ये असम्बद्धाः भवन्ति ते संयोजनेन परस्परं संयुक्ताः भवन्ति । तेषां संयुक्ते सति नवीनपदार्थानां निर्माणं भवति ।

2)विभाजनम् - विभाजनं नाम विभक्तक्रिया। हरबर्टस्पेन्सरमहोदयस्य मतानुसारं विभक्ते सति विनाशो न भवति। अत्र एकद्रव्यस्य विभाजनेन क्रमशो नवीनपदार्थानां निर्माणं भवति।

3) व्यवस्थापनम् - हरबर्टस्पेन्सरमहोदयः स्वीकरोति यत् संयोजनविभाजनयोर्द्वयोर्मेलनेन व्यवस्थितव्यवस्थायाः स्थापना भवति । तत्र उभाभ्यां नवीनपदार्थानां निर्माणं विकासं प्रदर्शयति ।

एतेषां त्रयाणां प्रदर्शनमेकस्मादुहारणादस्ति, तदुहारणमस्ति - शरीरम्। 'अवयवानां जनकत्वे सति अत्यन्तावयवि शरीरम्' इति लक्षणानुसारं विविधानामङ्गानां संयुक्तभावेन शरीरस्य निर्माणं भवति इति हरबर्टस्पेन्सरमहोदयस्य मतानुसारं संयोजनमस्ति। एवमेवं संयुक्ते शरीरे प्रत्येकमङ्गं भिन्नं भिन्नं कार्य करोति यथा चक्षुः केवलं पश्यति, श्रोत्रं केवलं शृणोति, त्वगिन्द्रियं केवलं स्पर्शं करोति इति विभाजनम् । परञ्च संयुक्तविभाजन्योरेतानि अङ्गानि मिलित्वा एव शरीरस्य स्थापनं कुर्वन्ति इति हरबर्टस्पेन्सरमहोदयस्य मतानुसारं व्यवस्थापनम् उच्यते ।

**लामार्कमहोदयस्य जैविकविकासवादः -**

जीवशास्त्रज्योतिषदर्शशास्त्रेषु कृतपरिश्रमः फान्सीसिविद्वान् लामार्कमहोदयः सृष्टिविकाससन्दर्भे 'जैविकविकासवादः' इति सिद्धान्तं रचितवान्। लामार्कमहोदयः जीवेषु विकासकाले परिवर्त्तनानामन्वेषणम् कृतवान् । महोदयमते जीवानां विकास क्रमे चतुर्विधानि परिवर्त्तानि भवन्ति -

1) वातावरणजन्यं परिवर्त्तनम् । 2) उपयोगानुप्रयोगप्रभावः।

3) अर्जितक्षमतानां नवीनजीवेषु सम्प्रेषणम्। 4) नवीनजातेर्निर्माणम्।

**1) वातावरणजन्यं परिवर्त्तनम् -**

लामार्कमहोदस्य मते वातवरणजन्यं परिवर्वत्तं जीवं सर्वाधिकरूपेण प्रभावितं करोति । वातावरणस्य बाह्याः शक्तयः जीवस्य स्थूलशरीरं विविधरूपेण परिवर्त्तयति। स्वस्य प्राणरक्षार्थं जीवः वातावरणेन सह सामञ्जस्यं स्थापयति। अस्य सामञ्जस्य काले जीवे अनेकानां विविधानामङ्गानां निर्माणं भवति। अयं अङ्गानां विकासक्रम उच्यते। बाह्यवातावरणकारणात् जीवस्य विविधानामङ्गानाम् विविधाः आवश्यकताः भवति तासामावश्यकतानां पूर्त्यर्थं तस्य शरीरस्य अङ्गेषु प्रसरणं सङ्कुचनं वा भवति । यथा जिराफ-इति पशोः मुखविशेषमङ्गं (गर्दन) अत्यधिकं दीर्घन्नासीत् परञ्च वृक्षाणां पत्राणि स जीवः भोजनरूपे स्वीकरोति तस्मात् तस्य अङ्गविशेषे प्रसरणमभवत् कारणस्वरूपं तस्य जीवस्य तदङ्गविशेषं दीर्घमभवत् इति विकासवादस्योदाहरणमस्ति ।

**2) उपयोगानुप्रयोगप्रभावः -**

विकासवादे अङ्गानामुपयोगानुपयोगाभ्यामपि लामार्कमहोदयः महत्त्वपूर्णं कारणं स्वीकरोति । यान्यङ्गान्युपयोगिनो भवन्ति तानि वारं वारम् उपयोगात् परिपुष्टानि भवन्ति । येषामङ्गानाञ्च प्रयोगो न भवति तान्यङ्गानि लुप्तवस्थामाप्नुवन्ति ।

**3) अर्जितक्षमतानां नवीनजीवेषु सम्प्रेषणम्** -

लामार्कमते यान् गुणान् मानवः स्वाभ्यासक्षमताभ्याम् अर्जयति ते गुणाः वंशानुक्रमे नवीनरूपमाप्नुवन्ति ।

**4) नवीनजातेर्निर्माणम् -**

लामार्कडार्विनमहोदयोरियमान्यताऽस्ति यत् जातयः चिरकालपर्यन्तं स्थायीरूपे न सन्ति। विकासक्रमे जातीनां निर्माणं भवति। लामार्हमतानुसारमावश्यकतायाः पूर्त्यर्थं नीवेनवंशानुक्रमे विविधाः प्रयासाः भवन्ति तदा जातेर्निमाणं भवति ।

**डार्विनमहोदस्य जैविकविकासवादः -**

पाश्चात्यमते प्रायः विकासवादः डार्विनमहोदयस्य पर्यायनाम अस्ति। डार्विनमतानुसारं कोऽपि ईश्वरः मानवस्य रचनाकारो नास्ति । तन्मते मानवः विकासकाले सर्वादौ पशुरूपे वानरः (कपिः) आसीत्, इत्यस्य मतस्य आलोचना संसारस्य प्रत्येकं धार्मिकसामाजिक-वर्गैरभवत्। परञ्च वैज्ञानिकाः डार्विनमहोदयस्यास्य मतस्य समर्थनं कृतवान्। विज्ञानेन समर्थितो विकासवादस्य सिद्धान्तोऽयं विश्वे विस्तृतं स्थानं लब्धवान् । डार्विनमहोदयस्य प्रशंसायां जुलिया हेक्सले वदति यत् डार्विनमहोदयो जीवशास्त्रस्य 'न्यूटन' इत्यासीत् । डार्विनमहोदयस्य सिद्धान्तोऽयम् 'ओरिजन ऑफ स्पेसिज', डिसेन्ट ऑफ मैन' इत्यनयोर्द्वयोः पुस्तकयोर्मुख्यत्वेन प्राप्यते ।

**डार्विनमते मनुष्यस्योत्पत्तिः -**

डार्विनमहोदयस्य मतमस्ति यदन्यानां जीवजन्तूनामिव मानवोऽपि विकासेन प्रादुर्भवोऽभवत्। डार्विनमहोदयस्य विश्वासोऽस्ति यत् मानवस्य विकास वानरादभवत् । यथा मत्स्यत कूर्मादीनां क्रमेण वानरस्याविर्भावोऽभवत् तथैव वानरतः मानवस्य निर्माणमभवत्। मानवे बुद्धि-सौन्दर्य-ज्ञान-स्मृत्यादयो ये सर्वश्रेष्ठाः गुणाः विद्यन्ते ते गुणाः पशुष्वपि विद्यन्ते । यदि पशुषु एते गुणाः न स्युश्चेत्तदा मानवस्य निर्देशने पशूनां कार्यसम्पादनं न स्यात् ।

पूर्वपक्षः - सन्दर्भेऽस्मिन् केचन जनाः पूवपक्षे शङ्कां स्थापयन्ति यद् मनुष्ये उपकारसहानुभूत्यादयो नेके गुणाः सन्ति अतः पशुश्रेण्यां तस्य गणनोचिता नास्ति?

उत्तरपक्षः - डार्विनमहोदयः उत्तरपक्षे अस्य प्रश्नस्योत्तरं ददन् वदति यत् एतेषां सर्वेषां गुणानामर्जनं आवश्यकतापूर्तौ मानवः स्वयमेव अर्जिताः । एतेषां गुणानां प्रदर्शनं मानवः समाजे यथावसरं करोति । गुणा एते पशुष्वपि प्राप्यन्ते कदापि तु तेषां कार्यैः ज्ञायते यदेते गुणाः तेषु मानवादधिकाः भवन्ति । समाजे नैकानि उदाहरणानि भवन्ति यत्र अश्वश्वानादयः पशवः स्वपालकस्य रक्षणे स्वस्य प्राणान् अपि त्यजयन्ति ।

**बिगबैंग-सिद्धान्तः -** पाश्चात्यमतेषु ब्रह्माण्डस्योत्पत्तिसन्दर्भे 'बिग-बैंग थ्योरी' इति सिद्धान्तो मुख्यरूपेण प्रसिद्धोऽस्ति । अस्य सिद्धान्तस्य जनकः बेल्जियमदेशस्य प्रसिद्धः खगोलशास्त्री जॉर्जलेमैत्रेमहो-दयोऽस्ति ।अस्य सिद्धान्तस्य मुख्य आधारः `a day without yesterday' अर्थात् ह्यं विना दिवसः इत्यस्ति।[8] 1927 तमवर्षे सिद्धान्तोऽयं मुख्यरूपेण प्रकाशितः। अस्य सिद्धान्तानुसारं 12-14 अरबवर्षाणि (नियुतवर्षाणि) पूर्वं ब्रह्माण्डस्योत्पत्तिः एकस्माद् सघनविस्फोटात् अभवत्।[9] अस्य विस्फोटस्य विशालत्वात् आङ्ग्लभाषायामस्य नाम Big Bang Theory इत्यस्ति यस्य हिन्दी भाष्यामर्थोऽस्ति - विशालः (Big) विस्फोटः (Bang) सिद्धान्तः (Theory) इति ।

**सिद्धान्तसमीक्षा -** बिगबैंगथ्योरी-इति सिद्धान्तोऽयम् अल्बर्ट आंइसटीनमहोदस्य प्रसिद्धसिद्धान्तस्य सापेक्षवादस्योपरि आधारितो-ऽस्ति। सिद्धान्तस्य सृष्टिविषयकधारणाद्वयमस्ति – भौतिकनियम-धारणा, ब्रह्माण्डनियमधारणा। ब्रह्माण्डनियमधारणानुसारं ब्रह्माण्डं सजातीयं समदेशिकञ्च भवति। सापेक्षतासिद्धान्तानुसारं विगबैंग-सिद्धान्तस्य ब्रह्माण्डं गोलाकारं सीमितश्चासीत्। एवं आदौ विस्फोटोऽभवत् विस्फोटाऽनन्तरं सृष्टिरभवत् अथ च लयोऽपि विस्फोटात् भविष्यतीति। परञ्च सिद्धान्तोऽयं स्पष्टरूपेण न वदति यत् विस्फोटात् पूर्वं किमासीत्? यदि ब्रह्माण्डं केन्द्रात् विस्तारितमभवत् तर्हि तत् केन्द्रं कुत्रास्ति? विस्फोटात् किञ्चित्कालपूर्वं शून्यकाले इमभवत् ? इत्येतेषां प्रश्नानामुत्तराणि अत्र नास्ति ।

**स्थिरावस्थासिद्धान्तः -** ब्रह्माण्डं सजातीयं समरूपं च इति ब्रह्माण्डविज्ञानस्य सिद्धान्तः हरमन बाण्डी, थोमस गौल्ड्, फ्रेड् होयल् च इति त्रयः ब्रिटिशवैज्ञानिकाः "पूर्णः ब्रह्माण्डशास्त्रीय-सिद्धान्तः" इति कथ्यते समग्रब्रह्माण्डसिद्धान्तः मन्यते यत् ब्रह्माण्डं न केवलं अन्तरिक्षे सजातीयं समरूपं च भवति, अपि तु कालस्य अपरिवर्तनीयम् अपि अस्ति । सम्पूर्णं ब्रह्माण्डसिद्धान्तं अनुसृत्य यः सिद्धान्तः भवति सः "स्थिर-स्थिति-सिद्धान्तः" इति उच्यते । एकं तु अयं सिद्धान्तः बिग-बैङ्ग-सिद्धान्तात् भिन्नः आसीत् यत् स्थिर-स्थिति-सिद्धान्तानुसारं ब्रह्माण्डस्य कदापि आरम्भः नासीत् तथा च केवलम् एतत् एव कदापि समाप्तं भविष्यति . इदानीं यथा दृश्यते तथा सर्वदा एव दृश्यते स्म, सर्वदा समानं दृश्यते च। स्थिरस्थितिसिद्धान्तः यदि जगतः विस्तारं प्राप्नोति इति तथ्यस्य अनुरूपः स्यात् तर्हि विश्वस्य निरन्तरं विस्तारः भवति परन्तु तस्य समग्ररूपं परिवर्तनं न भवति इति विरोधः जनयिष्यति द्रव्यस्य घनत्वस्य नित्यं भवितुं नूतनद्रव्यस्य निर्माणं तस्मिन् एव वेगेन करणीयम् यथा विस्फोटेन घनत्वं न्यूनीकरिष्यते । एवं एव सघनत्वं तथैव तिष्ठति ।

**मुद्रास्फीतिसिद्धान्तः -** अस्य सिद्धान्तस्य प्रवर्त्तकः एलन गुथ-महोदयः अस्ति। अस्य सिद्धान्तानुसारं ब्रह्माण्डे अत्यल्पावधौ 1035 सेकेण्ड-पलकालस्य विशालो विस्तारोऽभवत् अस्मात् विस्तारात् पदार्थविकरणयोः वर्धनशीले द्रव्यमाने सहसा तीव्रगत्या विस्तारोऽभवत् स विस्तारः मुद्रास्फीति इत्युच्यते। मुद्रास्फीतिविस्तारोऽयं 1030 सेकेण्डकाले समाप्तिमाप्तवान्। लघुमुद्रास्फीतेः अवधेरनन्तरं द्वयोः सिद्धान्तयोः त्रिज्या समाना एवासीत्। अस्य सिद्धान्तस्याभिप्रायोऽस्ति यत् यदा विलक्षणतायाः विस्फोटोऽभवत् तदा ब्रह्माण्डस्य विस्तारोऽभवत् । कालक्रमेण कणविकिरणाः शीता अभवन् अथ च अन्तरिक्षसमयनिर्वातेन सह सम्बन्धिताः ऊर्जा अपि शीतला अभवत् । लिंडे अल्ब्रेक्टमहोदयेन स्टीनहार्ट महोदयेन च गुथसिद्धान्ते संशोधनं कृत्वा अस्य अपरं नामकरणं 'नवीनमुद्रास्फीतिसिद्धान्तः' इति कृतम् । अस्मिन् नवीनसिद्धान्ते मुद्रास्फीतिः एकस्य पलस्य अत्यल्पकाल एव सरलतया विरामं याति। अत्रापि एकः प्रश्नो भवति यत् आदौ मुद्रास्फीतिः कस्मात् कारणादभवत् ?

**सृजननिश्शुल्कलंचसिद्धान्तः -** बिगबैंगसिद्धान्तानुसारम् अन्तरिक्षस्य निर्वात्तः अस्तित्वे नासीत् परञ्च विस्फोटाऽनन्तरं ब्रह्माण्डस्य विस्तार सहैवाभवत्। जेल्डोविच स्टारोबिंस्की-ट्रायॉनमहोदयोर्विचारोऽस्ति यत् ब्रह्माण्डस्य निर्माणं निर्वातिनाभवत्। एतदनुसारं ब्रह्माण्डे विद्यमानाः सर्वे कणाः सहसा संयोगात् दीर्घकालीना अभवन्। सिद्धान्तोऽयम् आभासीयकणानामकाल्पनिकौपस्थितेः तुलनायां पदार्थब्रह्माण्डयोरस्तित्वसम्बन्धितदीर्घकालीनावधेः व्याख्यां करोति। ब्रह्माण्डस्य रूवेषु विस्तारितपदार्थेषु सकारात्मका गतिज-ऊर्जा विपरीतया क्रियाशीलया गुरुत्वाकर्षणस्थितिज-ऊर्जया पूर्णतया सन्तुलिता भवति।[10] यस्य परिणामत्वेन ब्रह्माण्डस्य ऊर्जा शून्यस्वरूपा भवति। तथ्यमिदं मन्यते यत् इदमेव कारणमस्ति यत् ब्रह्माण्डं निर्वातस्य परिवर्त्तनात् प्रकाशमागच्छति । निर्वातेन च विमुक्त्य आभासीयकणानां स्थित्यर्थम् ऊर्जास्रोतस्य अवबोधनं न करोति ।

**सृजनवादः -** सृजनवादः एका धार्मिकमान्यता अस्ति यत् प्रकृति-ब्रह्माण्ड-पृथिवी-जीवन-मनुष्यादीनां तत्त्वानामुत्पत्ति ईश्वरस्य अलौकिककार्यैरभवत्। व्यापकार्थे सृजनवादे धार्मिकविचाराणां नैरन्तर्यं विद्यते यद् वैज्ञानिकान्वेषणानां स्विकृत्यस्वीकृतिभिन्नं प्राकृतिकप्रक्रियया पदार्थानामुत्प्पतिविकासादीनां वर्णनं करोति । सृजनस्य वाद इति सृजनवादः अत्र सृजनपदेन धार्मिकविश्वासं स्पष्टयति । विश्वासानुसारं ब्रह्माण्डस्य कर्त्ता-धर्त्ता-हर्त्ता-नियन्तारूपेण ईश्वरीयशक्तिरेवास्ति।मेनलाइनप्रोटेस्टेंटकैथोलिकचर्चादयः आधुनिक-विज्ञानं स्वविश्वासेन सह स्थापयन्ति । अस्मिन् सन्दर्भे ते विश्वसन्ति यत् ब्रह्माण्डस्य निर्माणं ईश्वरः विशेषोद्देश्यपूर्त्यर्थं करोति येन सृष्टेः सञ्चालनं सम्यक्तया चलति ।

**स्थिरदशासिद्धान्तः -** अस्य सिद्धान्तस्य प्रवर्त्तकः डॉ. फ्रेडहायलमहोदयः अस्ति । अयं विद्वान् ब्रिटेनदेशीयोऽस्ति । अस्य विदुषः सिद्धान्तानुसारं ब्राह्मण्डस्यास्तित्वं चिरकालादेवास्ति। बहुकालाद् ब्रह्माण्डमिदं प्रसरति एव । अस्य गतिः सतत् विद्यते। अस्य संसारस्य प्रसरणं कदापि परिवर्त्तनं न भवति न चास्य बाधनं सम्भवति। इदं ब्रह्माण्डं नित्यरूपेण चलति एव। अनया प्रसरणप्रक्रियया आकाशगङ्गामध्ये योऽवकाशो भवति तत्र हाईड्रोजनद्रव्यस्य उत्पत्तिः स्वत एव भवति। ते गैसीयकणाः तमवकाशं पूरयन्ति। अनेन प्रकारेण ब्रह्माण्डमिदं सततं प्रसरति। प्रक्रियेयं चिरकालात् प्रचलति स्म भविष्यकालेऽपि प्रचलने भविष्यति तस्मात् प्रसरणस्य दशेयं स्थिरा भवति अतः अस्य सिद्धान्तस्य नाम स्थिरदशासिद्धान्तोऽस्ति ।[11]

**विस्फोटसिद्धान्तः -** विस्फोटजन्यत्वादस्य सिद्धान्तस्य नाम विस्फोटवादः अस्ति । अस्य मतानुसारं विस्फोटात् सृष्टिः सृजति । अस्य सिद्धान्तस्य प्रवर्त्तकः श्रीमान् रॉयलमहोदयोऽस्ति। महोदयोऽयं कैम्ब्रिजविश्वविद्यालस्य शोधच्छात्र आसीत्। आचार्यमतानुसारं ब्रह्माण्डस्य उत्पत्तिः एकसहस्रकोटिवर्षाणि पूर्वमत्यन्तसघनपदार्थानां मध्ये विस्फोटादभवत्। अस्य विस्फोटाऽनन्तरमाकाशगङ्गा-ताराकादीनामुत्पत्तिर्भवत्। ब्रह्माण्डेऽपि प्रसरणशीलता अस्माद् विस्फोटाद् जायते। खगोलशात्रिणो मन्यन्ते यत् यदा प्रसरणशीलतेयं अवरुद्धा भविष्यति तदा गुरुत्वाकर्षणेन सर्वे आकाशीयाः पिण्डा विनष्टाः भविष्यन्ति तदा सर्गस्य लयः निश्चितः ।

**स्पन्दनशीलसिद्धान्तः -** स्पन्दनपदस्यार्थः परिवर्त्तनमस्ति। परिवर्त्तन-पदेन सम्प्रसारणसङ्कुचनयोरभिप्रायः गृह्यते। तस्मात् सिद्धान्तोऽयं प्रसरणसङ्कोचनयोर्वर्त्तते। पूर्वं विस्फोटात् प्रसरणं भवति प्रसरणानन्तरं पुनः सङ्कोचो भवति पुनश्च विस्फोटात् प्रसरणम् इति इति प्रक्रियेयं सर्वदा प्रचलत्येव। अस्य सिद्धान्तस्यापरं नाम दोलनसिद्धान्तोऽस्ति ।

सुपरस्ट्रिंगसिद्धान्तः -

**उपसंहारः -** मिस्रः सभ्यताया उद्गमस्थलं मन्यते। अस्याभिप्रायोऽयमस्ति यत् मिस्रः औपचारिकशिक्षायाः शिक्षायाश्च उद्गमस्थलमप्यस्ति। प्राचीनमिस्रदेशे हेलियोपोलिस-मेम्फिस-थेब्स-हर्मोपोलिसस्थानेषु रहस्यप्रणालीयुताः विद्यालयाः आसन्। नामान्येतानि मिस्रदेशे अध्यनरतयूनानिविचारकैः दार्शनिकैश्च दत्तानि। दर्शनशास्त्रगणितशास्त्रयोरुत्पत्ति मिस्रस्य रहस्यविद्या-लयेष्वभवत्। यद्यपि ब्रह्माण्डनिर्माणविषये हेलियोपोलिसविद्यालस्य मन्तव्यमस्ति यत् कस्यापि पदार्थस्य निर्माणात्पूर्वं जलस्य मौलिकरसातलमतिरिच्य किमपि नासीत्। रसातलस्वरूपमिदं 'नून' इति स्वरूपे ज्ञायते स्म। अस्मात् रसातलात् एटम-रा इत्यस्योदयोऽभवत् । तत्र सूर्यदेवः अग्निर्वा सर्वोच्चप्राणिरूपे विद्यमानौ स्तः। जीवननन्तकालयोर्भावना आसीत्। पिरामिडपाठानुसारं स अवदत् - मैं अनन्तकाल हूँ लाखों का निर्माता हूँ (अहमनन्तकालोऽस्मि लक्षकानां निर्माताऽस्मि) गेब इति पृथिवी नट इति च आकाशमासीत्। आहत्य तत्र अतुम-रा (सूर्यः अगनिर्वा) नून (जलम्) गेब (पृथिवी) नट (आकाशम्) इति चत्वारि तत्त्वानि आसन्। योरूबापरम्परायाः ब्रह्माण्डनिर्माणस्य स्वविशिष्टं विवरणमस्ति। किंवदन्तिरति यत् 'ओलोडुमारी' इति नामधेयस्य एकः सर्वोच्चः प्राणी आसीत्। यस्य एकः पुत्रः अडुडुवा इति अन्यच्च नैके लघुदेवाः आसन्। ओलोडुमराप्राणी भोजनाश्रयार्थं वृषं स्थापितवान पेयजलार्थञ्च रेशमरबर-इति वृक्षं स्थापितवान्। सहैव रसयुक्तश्वेतकाष्ठयुक्तं वृक्षमपि स्थापितवान्। अन्ते च ओलोडुमेरीप्राणी अरिसा-एनएलए-तत्त्वं मानवस्य भौतिकविशेषतायाः निर्माणार्थमादेशं दत्तवान् । तदनन्तरं विविधा मानवाः निर्मिताः । तदा ओलोडुमारेप्राणी मानवजीवनाय तस्मिन् श्वासप्रश्वासस्य सञ्चालनमकरोत्।

**सन्दर्भसूची**


1. ऋग्वेदः
2. तैत्तिरीयोपनिषत्
3. इण्डियन फिलोसॉफी, खण्ड – 1
4. The early history of heaven
5. प्रारम्भिक खगोल विज्ञान,
6. इतिहास के परिप्रेक्ष्य में अन्वेषण
7. हिस्ट्री ऑफ फिलॉसफी
8. पाश्चात्त्यदर्शन के सम्प्रदाय
9. The Beginning of the World from the Point of View of Quantum Theories
10. Review of modern cosmological theories
11. भारतीयसृष्टिविद्या